**SHARADA** (A Peer-Reviewed Journal), [Vol. 1, No. 2, Whole No. 2, June 2026], ISSN: 3102-0658 (P)

# ‘सुध्युपास्य’ इति रूपविमर्शः

**जगन्नाथः शर्मा (विद्यावारिधिः)**

*सहप्राध्यापकः, ने.सं.वि., महेशसंस्कृतगुरुकुलविद्यापीठम्*

jagannathsharma9847@gmail.com

https://orcid.org/0009-0002-0708-7826

https://doi.org/10.3126/srj.v1i2.99127

**लेखसारः**

*नापूर्वमिदं वचो यत्, शास्त्रस्मरणपूर्वकं तदनुसन्धानपुरस्सरञ्च कृतः साधुशब्दप्रयोग एव विशिष्टं फलं जनयतीति। तथा च प्रमाणम्–'एकः शब्दः सम्यग्ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके कामधुग्भवतीति' (पतञ्जलिः, सन् २०२३, पृ.८४) श्रुतिरेव। तत्र च शब्दसाधुत्वविषयकविचिकित्सायां मुनित्रयोक्तिरेव प्रमाणपदवीमधिरोहति, नान्यदिति सूत्रवार्तिकभाष्यानुगुणं तत्तत्प्रयोगानुसन्धानं शब्दसाधुत्वज्ञानाय सर्वादौ विधेयम्। तदेव च निखिलसाधुशब्दान्वाख्यानोपयोगीत्यत्र नास्ति विप्रतिपत्तिलेशोऽपि। अत एव च श्रुतौ शास्त्रान्वितत्वांशो प्रविष्टः। तथा च लेखेऽस्मिन् व्याकरणशास्त्रानुसारं "सुध्युपास्यः" इति रूपस्य साधुत्वमवलोक्यते। तथा हि 'सुधीभिरुपास्यः' इति विग्रहे 'सुधी उपास्य' इत्यत्र यण्णिष्यते, परन्तु तं प्रबाध्य "सम्प्रसारणाच्च" (पा.सू ६।१।१०८) इति पूर्वरूपं प्राप्नोतीति लोके मुहुर्मुहुः प्रयुज्यमानः'सुध्युपास्यः' इति यण्घटितप्रयोगः कथं शास्त्रान्वित इति संशयः समुदेति। तद्वारणोपाय एवात्र लेखे विस्तरेण विचारितो वर्तते। तत्र सर्वादौ सामान्यतः रूपसिद्धिं प्रदर्श्य तदन्वाक्षेपपुरस्सरं समाधानमत्र निगदितं वर्तते। मनोरमायां केचन विषयाः विषयेऽस्मिन्विचारिताः, ते सर्वादौ समुपस्थाप्य ततः शब्दरत्नोक्तदिशा विचारितं वर्तते। ततः चित्रप्रभाख्यटीकानुसारं विषयेऽस्मिन्विचाराः समुपस्थापिताः, यत्र 'हलः' (पा.सू ६।४।२) इति सूत्रस्य वैयर्थ्यप्रतिपादनपूर्वकं ज्ञाप्यांशत्रयं निगदितं वर्तते, येन 'शकह्वर्थम्' 'परिव्यर्थम्' इत्येतच्छमशीले'सुध्युपास्यः' इत्यादौ स्थानिवद्भावेन सम्प्रसारणत्वमादाय "हलः" इति दीर्घसिद्धिः, "सम्प्रसारणाच्च" इति पूर्वरूपाभावश्च सिद्ध्यति।*

**शब्दकुञ्जी-** पूर्वरूपम्, यण्, सम्प्रसारणम्, संहिता, हलः।

## विषयपरिचयः

व्याकरणशास्त्रमिदं वाग्ब्रह्मप्रतिपादनपरं प्रधानतमं शास्त्रम्। सर्वोऽपि हि व्यवहारः वाचैव निष्पाद्यते, नान्येन पथा। व्याकरणञ्च पश्यन्तीमध्यमावैखरीत्येवमनेकतीर्थभेदायाः वाचः परं पदं वर्तते। तथा चोक्तम्-

वैखर्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम्।
अनेकतीर्थभेदायास्त्रय्या वाचः परं पदम्॥ *(पतञ्जलिः, सन् २०२३, पृ.४४)*

तासां मध्ये आस्यपर्यन्तमागच्छता वायुना कण्ठदेशं गत्वा मूर्धानमाहत्य ततः परावृत्य तत्तत्स्थानेष्वभिव्यक्ता ध्वन्यात्मिका वागेग वैखरीत्युच्यते। हृदयदेशपर्यन्तमागच्छता वायुना हृदयदेशेऽभिव्यक्ता बुद्ध्या विषयीक्रियमाणा हिरण्यगर्भदैवत्या परश्रोत्रग्रहणायोग्यतया सूक्ष्मा वागेव मध्यमेत्युच्यते। पराख्यामेव नाभिपर्यन्तमागच्छता वायुनाऽभिव्यक्ता वाक्पश्यन्तीत्युच्यते।

एतादृशवाग्ब्रह्मप्रतिपादकं शास्त्रमिदं लोकव्यवहारनिर्वाहिकाया वैदिक्याश्च वाचो विवेचनपरेषु शिक्षाछन्दोनिरुक्तव्याकरणेति चतुर्ष्वपि वेदाङ्गेषु इतरेषु चाङ्गेषु प्रधानतमं भवति। 'प्रधानं च षट्स्वङ्गेषु व्याकरणं, प्रधाने च कृतो यत्नः फलवान् भवती'ति महाभाष्यकारवचनात्। आनन्दवर्धनोऽपि 'प्रथमे हि विद्वांसो वैयाकरणाः व्याकरणमूलत्वात् सर्वविद्यानाम् इति स्वीकरोति। भारते वाग्देवी सम्यगाराधिता पूर्वाचार्यैः। वेदव्याख्यानपरेषु षट्स्वङ्गेषु निरुक्तं, शिक्षा, व्याकरणं, छन्दश्चेति चत्वार्यङ्गानि भाषाया विश्लेषणेन साक्षात् सम्बद्धानि वर्तन्ते। तत्रापि व्याकरणस्य महती परम्परा भाषायामस्यां दरीदृश्यते। तथा हि व्याकरणपरम्परायामष्टानां वैयाकरणानामुल्लेखो वर्तते-

इन्द्रश्चन्द्रः काशकृत्स्नापिशलीशाकटायनाः।
पाणिन्यमरजैनेन्द्रा जयन्त्यष्टौ च शाब्दिकाः॥ (कविकल्पद्रुमस्य प्रारम्भे उद्धृतम्-पृ.७३)

तत्र पाणिनेरष्टाध्यायी समुपलब्धानि सर्वाण्यपि व्याकरणान्यतिशेते स्वरचनावैशिष्टचेन श्रुतिमूलकत्वेन च। तथा हि महाभाष्यकार एवमाह-'प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचाववकाशे प्राङ्गुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुं किं पुनरियता सूत्रेण" इति। *(पतञ्जलिः, सन् २०२३, पृ.१६०)* 'सामर्थ्ययोगान्नहि किञ्चिदत्र पश्यामि शास्त्रे यदनर्थकं स्यादिति च। *(पतञ्जलिः, सन् २०२३, पृ.७८)* एतेनैषा शङ्कापि प्रत्याख्यापि पतञ्जलिना यत् वैदिकानां शब्दानां ज्ञानं वेदेभ्योऽथ च लौकिकानां शब्दानां लोकेभ्यः सम्भवतीत्यतोऽनर्थकं व्याकरणमिति। यदि सूत्रस्थस्य वर्णैकस्यानर्थक्यं न प्रसज्यते तर्हि सम्पूर्णस्य शास्त्रस्यानर्थक्यप्रतिपादनमज्ञानविजृम्भितमेव। तथा च 'साध्वनुशासनेऽस्मिन्शास्त्रे-' इति तत्र तत्र महाभाष्यकारवचनान्निखिला अपि साधुशब्दाः पाणिनीयव्याकरणेनैव संसाधनीयाः। अत एवोद्घोष्यते किं नाम साधुत्वमिति प्रश्ने समाधानम्-'पाणिनीयव्याकरणान्वितत्वे सति शिष्टप्रयुक्तत्व'मिति। तथा ह्ययमत्राशयः- शब्दनिष्ठसाधुत्वस्य प्रत्यक्षाद्यवेद्यत्वेन सांधुत्वनिश्चयो यद्यपि न सम्भवति तथापि व्याकरणेन तत्र साधुत्वनिश्चय: सम्भवति। व्याकरणप्रणेतॄणां महर्षीणां तु आर्षज्ञानेन तन्निश्चयः। अत एव तेषां लक्ष्यैकचक्षुष्कत्वव्यवहारः। तादृशव्याकरणेषु बहुषु सत्स्वपि अद्यत्वे साधुत्वव्यवस्थापकं पाणिनीयमेव। "शताच्च ठन्यतावशते" (पा.सू ५। १। २१) इति सूत्रे नियतकालाश्च स्मृतयो व्यवस्थाहेतव इति मुनित्रयमतेनाद्यत्वे साध्वसाधुप्रविभाग इति कैयटेन स्पष्टमभिहित्वात् आपिशलकाशकृत्स्नादिव्याकरणानामिदानीं साधुत्वव्यवस्थापकत्वाभावाध्यवसानात्। तथा च निखिलानामपि साधुशब्दानां पाणिनीयव्याकरणरीत्या साधुत्वव्यवस्थापनमावश्यकम्। तथा हि "इको यणचि" इत्यादीनां सूत्राणां 'इकः प्रसङ्गे यण्णुच्चारणीयः, तद्घटितप्रयोगश्च साधुः, स च प्रयोक्तव्यः' इति साधुत्वपर्यन्तमर्थः। तथा च तुल्यरीत्या "सम्प्रसारणाच्च" इति सूत्रस्य 'अच्परकसम्प्रसारणस्थले पूर्वपरयोरुच्चारणप्रसङ्गे पूर्वसवर्णस्यैवोच्चारणं कर्तव्यम्, तच्च साधु, तच्च प्रयोक्तव्यमि'त्यर्थः। एवञ्च 'सुष्ठु ध्यायतीति' विग्रहे 'ध्यायतेः सम्प्रसारणं च' (वार्तिकम् ३। २। १७८) इत्यनेन क्विपि सम्प्रसारणे च कृते "सम्प्रसारणाच्च" इति सूत्रेण पूर्वरूपे "अङ्गावयवाद्धलः परं यत्संप्रसारणं तदन्ताङ्गस्य दीर्घः स्यात्" इत्यर्थकेन "हल:" इति सूत्रेण दीर्घे सुधी-शब्दः निष्पद्यते। ततः 'सुधीभिरुपास्यः' इति विग्रहे समासे सुब्लुकि 'सुधी उपास्यः' इत्यत्र यणं प्रबाध्य सम्प्रसारणादचि परतः

'सम्प्रसारणाच्च' (पा.सू ६। १। १०८) इति पूर्वरूपस्य प्रवृत्या तस्य च साधुत्वपर्यन्तार्थकत्वात्पूर्वरूपघटितस्यैव प्रयोगस्य साधुत्वबोधकत्वापत्तिरिति प्रश्नो जायते। तत्समाधानञ्चात्र स्थानिवद्भावेन सम्प्रसारणत्वं 'सुधी'त्यत्रेकारे नानेतुं शक्यत इति न तदादाय पूर्वरूपप्रसक्तिरिति न दोषः। तत्र च नैके आक्षेपाः, प्रश्नाः, संशयाश्च समुत्तिष्ठन्ति, ते चाधस्तादिह समाधीयन्ते।

## लेखसमस्याः

सर्वेषामपि शास्त्राणां स्वस्वविषयाः विभिन्नाः वर्तन्ते। यथा न्यायस्य प्रमाणप्रमेयविमर्शो विषयः। पूर्वमिमांसायाः श्रुतिवाक्यानि विषयः, उपनिषद्वाक्यानि चोत्तरमिमांसायाः। तथा व्याकरणस्य पदसाधुत्वं विषयः। तत्र च व्याकरणेषु निखिललौकिकवैदिकशब्दनिष्पादकत्वेन श्रुतिमूलकत्वेन च प्रधानत्वाद्पाणिनीयव्याकरणानुसारं निखिलशब्दसाधुत्वज्ञानं सम्पादनीयम्। तथा च 'सुध्युपास्यः' इत्यत्र पाणिनीयव्याकरणानुसारं साधुत्वप्रतिपादनाय प्रस्तुतेऽस्मिल्लेखे लेखोपस्थापनात्पूर्वं समुपागताः समस्याः एताः भवन्ति-

क) 'सुध्युपास्यः' इत्यत्र पूर्वरूपं कुतो न?

ख) 'अनल्विधा'विति पर्युदासात्स्थानिवद्भावेन सम्प्रसारणत्वाभावात्कथं 'हलः' इति सूत्रसार्थक्यम्?

ग) शकह्वर्थम्, परिव्यर्थमित्यादौ पूर्वरूपं कुतो न भवति?

घ) 'हलः' इति सूत्रस्य ज्ञापकत्वं स्वांशे प्रयोजनत्वञ्च कथम्?

## लेखोद्देश्यम्

उपर्युक्तसमस्यानां समाधानमेव लेखस्यास्य प्रमुखमुद्देश्यमस्ति। तथा च लेखस्यास्य प्रमुखान्युद्देश्यानि –

क) 'सुध्युपास्यः' इत्यत्र पूर्वरूपवारणप्रतिपादनम्।

ख) 'हलः' इति सूत्रस्य ज्ञापकत्वप्रतिपादनं सिद्धान्तमतसमीक्षणञ्च।

ग) 'शकह्वर्थम्''परिव्यर्थ'मित्यादौ पूर्वरूपवारणाय ज्ञाप्यांशत्रयविचारणम्।

घ) वस्तुतः ज्ञाप्यांशत्रितयखण्डनपुरस्सरं भाष्यरीत्या सिद्धान्तसमीक्षणम्।

## अध्ययनविधिः

प्रस्तुतशोधकार्ये सन्दर्भे विश्लेषणविधिः, तुलनात्मकविधिश्चाश्रितो विद्यते। एवं सिद्धान्तप्रतिपादनावसरे तुलनात्मकविधिः, विवरणात्मकशैल्या समीक्षणात्मकश्च विधिः समाश्रितो वर्तते।

## सामग्रीसङ्कलनप्रस्तुतिः

'सुध्युपास्यः इति रूपविमर्शः' इति विषयमादाय' प्रस्तुतेऽस्मिन्विषये प्रस्तुतशोधकार्यस्य सम्पादनाय श्रीमद्भट्टोजिदीक्षितकृतप्रौढमनोरमायाः, तट्टीकाभूतशब्दरत्नस्य तथा तद्व्याख्यानभूतायाः हरिशर्मकृतचित्रप्रभायाः सुब्रह्मण्यशास्त्रिविरचिततट्टिप्पण्याश्च विशेषतो लेखसामग्रीरूपेण सङ्कलनं कृतं वर्तते। एवमेव दीक्षितविरचितवैयाकरणसिद्धान्तकौमुदी, वाक्यपदीयम्, प्रदीपोद्योतसहितमहाभाष्यम्, काशिकादिग्रन्थाश्चात्र लेखे सहायकरूपेणोपयुक्ता वर्तन्ते।

## 'सुध्युपास्यः' इति रूपविमर्शः

'सुधीभिरुपास्यः' इति लौकिकविग्रहे 'सुधी भिस् उपास्य सु' इत्यलौकिकविग्रहे "कर्तृकरणे कृता बहुलम्" (पा.सू २। १। ३२) इति सूत्रेण कर्तरि विहिता या तृतीया, तदन्तस्य कृदन्तेन सह समासे, समासत्वात् "कृत्तद्धितसमासाश्च" (पा.सू १२। ४६। ) इति सूत्रेण प्रातिपदिकसंज्ञायां प्रातिपदिकावयवस्य च सुपः "सुपो धातुप्रातिपदिकयोः" (पा.सू २। ४। ७१) इति सूत्रेण लुकि सुधी + उपास्य इत्यत्र 'इको यणचि' (पा.सू ६। १। ७७) इत्यनेन यणि सुध्युपास्यः इति रूपं भवति। तत्र सुधी-शब्दावयवस्य इको यण्कथमिति प्रश्नः। तथा ह्ययं प्रश्नाशयः-'सुष्ठु ध्यायतीति' विग्रहे 'ध्यायतेः सम्प्रसारणं च' इत्यनेन क्विपि सम्प्रसारणे च कृते "सम्प्रसारणाच्च" इति सूत्रेण पूर्वरूपे "अङ्गावयवाद्धलः परं यत्संप्रसारणं तदन्ताङ्गस्य दीर्घः स्यात्" इत्यर्थकेन "हलः" (पा.सू ६। ४। २) इति सूत्रेण दीर्घे सुधी-शब्दः निष्पन्नो वर्तते। तथा च तत्र सति सम्प्रसारणे निष्पन्नत्वेन'सुधी उपास्य' इत्यत्र सम्प्रसारणादचि परतः 'सम्प्रसारणाच्च' (६.१.१०८) इति पूर्वरूपेण बाधात् कथं यणिति प्रश्नः। तत्र मनोरमाकारा एवं समादधुः- 'सम्प्रसारणपूर्वत्वे समानाङ्गग्रहणमिति वार्तिकोक्तेः। सम्प्रसारणस्थानिकस्यातथात्वाच्च' इति। अत्र समाधानद्वयमभिप्रेतं वर्तते।

**तत्र प्रथमसमाधानाशयः-**

"सम्प्रसारणाच्च" इति सूत्रे भाष्ये "शकह्वर्थम्' 'परिव्यर्थम्' इत्यत्र यणं प्रबाध्य "सम्प्रसारणाच्च" इति पूर्वरूपं प्राप्नोतीत्याशङ्क्य सम्प्रसारणपूर्वत्वे समानाङ्गग्रहणमिति समाधानमुक्तम्। तथा हि भाष्यम्- संप्रसारणात्परपूर्वत्वे समानाङ्गग्रहणमसमानाङ्गप्रतिषेधार्थम् - संप्रसारणात्परपूर्वत्वे समानाङ्गग्रहणं कर्तव्यम्। किं प्रयोजनम् ? असमानाङ्गप्रतिषेधार्थम्। असमानाङ्गस्य मा भूदिति - शकह्वर्थम्, परिव्यर्थमिति। अयमत्राशयः- 'शकान् ह्वयति'इति विग्रहे ह्वे-धातोः आदौ आदेच उपदेशेऽशिति (पा.सू ६। १। ४५) इत्यनेन आकारादेशे ततश्च क्विप्-प्रत्यये, वचिस्वपियजादीनां किति (पा.सू ६। १। १५) इत्यनेन वकारस्य सम्प्रसारणे उकारे, तत उकार-आकारयोः सम्प्रसारणाच्च इति पूर्वरूपे ततः "हलः" इत्यनेन दीर्घादेशे कृते शकहू-शब्दः सिद्ध्यति। एवमेव परिपूर्वाद्ध्येञः क्विपि, तस्य सर्वापहारिलोपे यजादित्वात्"वचिस्वपियजादीनां किति" इति सूत्रेण संप्रसारणे "सम्प्रसारणाच्च" इति पूर्वरूपे 'हलः' इति दीर्घे परिवी-शब्दो निष्पद्यते। तत्र यद्यपि 'परिवि' इत्यवस्थायां "ह्रस्वस्य पिति कृति तुक्" (पा.सू ६। १। ७१) इति तुगागमः, "हलः" इति दीर्घश्च प्राप्नोति, तथापि परत्वाद्दीर्घ इत्यवसेयम्। तत्रोभयत्र शकहुवे, परिविये इति विग्रहे "चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः" (पा.सू २। १। ३६) इति सूत्रेण अर्थशब्देन समासे 'शकहू अर्थ' परिवी अर्थ' इत्यत्र यणं प्रबाध्य "सम्प्रसारणाच्च" इति पूर्वरूपं प्राप्नोति, तद्वारणाय समानाङ्गग्रहणं कर्तव्यम्। तथा च समानाङ्गस्थयोरेव पूर्वपरयोः "सम्प्रसारणाच्च" इति पूर्वरूपं भवतीति वक्तव्यम्। तेन चात्र शकहू-परिवी-इत्येकङ्गम्, अर्थ-इत्यपरमिति पूर्वपरयोः समानाङ्गस्थत्वाभावान्न दोषः इति। तथा च तुल्यन्यायेनात्रापि 'सुधी उपास्य' इत्यत्र पूर्वपरयोः भिन्नाङ्गस्थत्वान्न दोषः।

**समानाङ्गत्वपरिष्कारः-**

ननु 'सुधी उपास्य' इत्यत्र यद्यपि सुधी-उपास्येतिविभिन्नाङ्गस्थत्वं पूर्वपरयोर्वर्तते, परन्तु सधी-उपास्य इति विशिष्टस्यापि विशिष्टोत्तरजायमानसुपं निमित्तीकृत्याङ्गत्वात्वर्तत एवाङ्गसंज्ञेति समानाङ्गग्रहणेऽपि दोषस्तदवस्थ एवेति चेदुच्यते- समानाङ्गग्रहणेन 'शकह्वर्थम्''परिव्यर्थम्' इत्यादौ पूर्वरूपवारणपरभाष्यप्रामाण्यादिह समानाङ्गत्वं न

केवलं समानाङ्गसंज्ञकासमुदायस्थत्वमपि तु 'सम्प्रसारणप्रयोजकप्रत्ययनिरूपिताङ्गत्वानवरुद्धसमुदायघटक-वर्णाघटितत्वम्' ।

तच्चात्र पूर्वरूपस्थानिनोर्नास्तीति यथा शकह्वर्थमित्यादौ न पूर्वरूपमेवमेव सुध्युपास्यः इत्यत्रापि न भविष्यति। तथा हि'शकह्वर्थम्' इत्यत्र सम्प्रसारणप्रयोजकप्रत्ययः- क्विप्प्रत्ययः, तन्निरूपितमङ्गत्वम् 'शकहू' इति समुदायनिष्ठम्, तादृशाङ्गत्वानवरुद्धसमुदायः अर्थेति समुदायः, तद्घटकवर्णघटितत्वमेवेह वर्तते, नत्वघटितत्वमिति नात्र समानाङ्गस्थत्वम्। एवमेव 'सुध्युपास्य' इत्यत्रापि तादृश (उपास्य)समुदायघटकवर्णघटितत्वमेव न त्वघटितत्वमिति न तत्वम्। तथा च 'सुध्युपास्यः' इत्यत्र पूर्वरूपाप्रवृत्या यणीष्टसिद्धिरिति भावः।

**द्वितीयसमाधानाशयः-**

'सम्प्रसारणस्थानिकस्य स्थाने जातस्य 'हलः' इति दीर्घस्य सम्प्रसारणत्वाभावच्च पूर्वरूपं न भविष्यतीति द्वितीयं समाधानम्। अयमत्राशयः- 'सुधी उपास्य' इत्यत्र "सम्प्रसारणाच्च" इत्यस्य प्राप्तिरेव नास्ति। सम्प्रसारणादचि परतो हि पूर्वरूपविधायकं तत्सूत्रमिह तु सुधीघटकेकारस्य नैव सम्प्रसारणत्वम्। तथा हि 'सुधि आ' इत्यत्र पूर्वरूपे, ततः दीर्घे निष्पन्नस्यास्य सम्प्रसारणस्थानिकस्य नास्ति सम्प्रसारणत्वम्। तद्धि स्थानिवद्भावेनानेयम्, परन्तु 'स्थान्यल्वृत्तिधर्माश्रये कार्ये कर्तव्ये "अनल्विधा'विति तत्प्रतिषेधादिह च सम्प्रसारणत्वस्याल्वृत्तिधर्मत्वात्तदाश्रये पूर्वरूपे कर्तव्ये सम्प्रसारणत्वं स्थानिवद्भावेनानेतुं न शक्यते। तथा च 'सुध्युपास्यः' इत्यत्र यण्निर्बाध इति भावः।

तत्र प्रश्नः-नन्वत्र सम्प्रसारणस्थानिकस्य सम्प्रसारणत्वभावादेव न पूर्वरूपमिति यदुक्तं तन्न युज्यते, अन्यथा सुधी-शकहू-इत्यादौ दीर्घ एव दुर्लभः। तथा हि 'सु ध्इ आ' 'शकह्उ आ' इत्यत्र "सम्प्रसारणाच्च" इति पूर्वरूपे ततः दीर्घो वक्तव्यः, परन्तु कृते पूर्वरूपे सम्प्रसारणस्थानिकस्य तस्य सम्प्रसारणत्वाभावान्न "हलः" इति सम्प्रसारणस्थानिको दीर्घः प्राप्नोतीति चेदुच्यते- तत्र "हलः" इति सम्प्रसारणस्य दीर्घविधायकसूत्रप्रामाण्यात्तत्र दीर्घे सत्वेऽपि कृते तस्मिन्सम्प्रसारणत्वे मानाभाव इति भावः।

**अत्र चित्रप्रभाकाराः-** 'हल इत्यारम्भसामर्थ्यादल्विधौ स्थानिवत्वाङ्गीकारेऽपि' इत्यनेन " हलः" इत्यारम्भसामर्थ्यात् सम्प्रसारणस्थानिकपूर्वरूपस्य अल्विधिसामान्येऽपि स्थानिवद्भावेन सम्मसारणत्वं भवति" इति ज्ञायते। तथा सति 'सम्प्रसारणपूर्वत्वे समानाङ्गग्रहणं कर्तव्यमि'ति वार्तिकस्वीकारेण शकह्वर्थमित्यादौ वारणेऽपि यजेर्लिटि ईजतुरित्यादौ पूर्वरूपं दुर्वारं स्यादिति आक्षिप्य त्रिधा ज्ञापक-विशेषं स्वीकृत्य प्रयोजनान्तरमपि साधनीयमित्यभिप्रयन्ति। तथा हि 'ईजतुः' इत्यत्र 'यज् अतुस्' इत्यत्र उभयेषांग्रहणेन पुनर्विधानं लभ्यते इति, तत्फलित"सम्प्रसारणं तदाश्रयञ्च कार्यं बलबदि'ति न्यायेन पूर्वं सम्प्रसारणे ततः पूर्वरूपे 'इज् अतुस्' इत्यत्र द्वित्वेऽभ्यासादिकार्ये सवर्णदीर्घे 'ईजतुः' इति रूपं भवति। अत्र 'इ इज् अतुस्' इत्यत्र पवर्णदीर्घं प्रबाध्य पूर्वरूपापत्तिर्दोषः।

**प्रथमज्ञाप्याशः-**

'हलः' इत्यारम्भसामर्थ्यात् सम्प्रसारणस्थानिकमात्रस्थानिककार्यप्रयोजक-स्थानिवद्भावप्रयोज्य-सम्प्रसारणत्वस्यानल्विधाविति प्रतिषेधो न प्रतिबन्धकः इति स्वीक्रियते। तेन शकहूरित्यादौ सम्प्रसारणस्थानिकस्य पूर्वरूपस्य स्थानिवद्भावेन सम्प्रसारणतया हल इति दीर्घः। शकह्वर्थमित्यादौपुनर्दीर्घस्तु न। तस्य सम्प्रसारणस्थानिकमात्रस्थानिकत्वाभावात्।

तथा हि 'शकहू:' इत्यत्र सम्प्रसारणस्थानिकं कार्यमित्युक्तौ पूर्वरूपात्मकम्, तत्प्रयोजको यः स्थानिवद्भावः पूर्वरूपप्रयोजकस्थानिवद्भावः, तत्प्रयोज्यस्थानिवद्भावस्यानल्विधाविति प्रतिषेधो न भवति। 'शकह्वर्थम्' इत्यत्र तु तद्भिन्नस्थानिवद्भावे कर्तव्ये तत्प्रतिषेधो प्रवर्तत एवेति न यणं प्रबाध्य पूर्वरूपम्।

**द्वितीयज्ञाप्यांशः-**

'हलः' इत्यारम्भसामर्थ्यात् सम्प्रसारणस्थानिकस्य स्थानिवद्भावेन सम्प्रसारणत्वमाश्रि-त्य तस्यान्यस्य वा पूर्वरूपातिरिक्तकार्यकर्तव्यतायामनल्विधाविति निषेधो न प्रवर्तते इति ज्ञाप्यते।

एवञ्च पूर्वोक्तरीत्या शकहूरित्यादौ सम्प्रसारणस्थानिकस्य पूर्वरूपस्य स्थानिवद्भावेन सम्प्रसारणतया हल इति दीर्घः। शकह्वर्थमित्यादौपुनर्दीर्घस्तु न। तथा हि 'शकहू:' इत्यत्र सम्प्रसारणस्थानिकस्य पूर्वरूपस्य स्थानिवद्भावेन सम्प्रसारणात्वमाश्रित्य तस्यान्यस्य वार्थशब्दघटकाकारस्य पूर्वरूपातिरिक्तकार्यकर्तव्यतायामनल्विधाविति निषेधो न प्रवर्तते। तेन दीर्घे कर्तव्ये न प्रतिषेधः, पूर्वरूपरूपे कार्ये कर्तव्ये तु भवत्येव स्थानिवद्भाव इति शकह्वर्थमिति सिद्धिः। अयञ्च द्वितीयज्ञाप्यांशः प्रथमज्ञाप्यांशापेक्षया युक्ततरः। तथा हि सिद्धान्ते 'यून:' इत्यत्र यकारस्य सम्प्रसारणं कुतो नेति चेत्" न सम्प्रसारणे सम्प्रसारणमि" (पा.सू ६। १। ३६)ति प्रतिषेधान्नेति वक्तव्यम्। परन्त्वयमत्र विचारणीयांश:- कथमत्र स निषेधः प्रवर्तते। तथा हि 'यून् अस्' इत्यत्र उकारे सम्प्रसारणे परतः सम्प्रसारणप्रतिषेधोःनेन कर्तव्य:। परन्त्वत्र समप्रसारणत्वमेव दुर्लभं सम्प्रसारणस्थानिके तस्मिन्नत: "न सम्प्रसारणे सम्प्रसारणम्" इति निषेधारम्भसामर्थ्यादिवेहानल्विधाविति प्रतिषेधो न प्रवर्तते इति वक्तव्यम्। परन्त्विदानीं द्वितीयज्ञाप्यांशानुसारं युवन् शब्दात् शसि वस्य सम्प्रसारणे पूर्वरूपे यून इति जाते तत्र पूर्वरूपस्य तदतिरिक्तयकारस्य वा पूर्वरूपातिरिक्तसम्प्रसारणनिषेधरूपे कार्ये कर्तव्ये तन्निषेधाप्रवृत्तेः स्थानिवद्भावात् 'न सम्प्रसारणे सम्प्रसारणम्' इति निषेधसिद्धेः निषेधारम्भसामर्थ्यानुधावनं न कर्तव्यमिति लाघवमिति बोध्यम्।

**तृतीयज्ञाप्यांशः-**

'हलः' इत्यारम्भसामर्थ्यात् सम्प्रसारणस्थानिकस्य तत्स्थानिकस्य वा स्थानिवद्भावेन सम्प्रसारणत्वमादाय पूर्वरूपातिरिक्ते यत्किञ्चित्कार्ये कर्तव्ये नास्त्यनल्विधाविति प्रतिषेध इति ज्ञाप्यते। एवञ्चात्र पक्षेऽपि पूर्वोक्तरीत्या शकहूरित्यादौ सम्प्रसारणस्थानिकस्य पूर्वरूपस्य स्थानिवद्भावेन सम्प्रसारणतया हल इति दीर्घः। शकह्वर्थमित्यादौपुनर्दीर्घस्तु न। तथा हि 'शकहू:' इत्यत्र सम्प्रसारणस्थानिकस्य पूर्वरूपस्य स्थानिवद्भावेन सम्प्रसारणात्वमाश्रित्य तस्यान्यस्य वार्थशब्दघटकाकारस्य पूर्वरूपातिरिक्तकार्यकर्तव्यतायामनल्विधाविति निषेधो न प्रवर्तते। तेन दीर्घे कर्तव्ये न प्रतिषेधः, पूर्वरूपरूपे कार्ये कर्तव्ये तु भवत्येव स्थानिवद्भाव इति शकह्वर्थमिति सिद्धिः। अस्मिञ्च पक्षे द्वितीयपक्षापेक्षयैतावान्विशेषो यदत्र न केवलं सम्प्रसारणस्थानिकस्यापि तु तत्स्थानिकस्य नाम सम्प्रसारणस्थानिकस्थानिकस्यापि सम्प्रसारणत्वमादाय पूर्वरूपातिरिक्तकार्ये कर्तव्ये अनल्विधावितिप्रतिषेधाभाव उच्यते। तथा च द्वितीयपक्षोक्तफलमत्रापि वर्तत एव, द्वितीयज्ञाप्यांशस्य सर्वांशेनात्राप्यन्तर्भावात्। अयञ्च तृतीयज्ञाप्यांशः प्रथमद्वितीयज्ञाप्यांशापेक्षया युक्ततमः। पक्षद्वयफलस्य तदतिरिक्तफलस्य चात्र सिद्धेः। तथा हि सिद्धान्ते वव्रश्चेत्यत्र 'ओ व्रश्चू च्छेदने' (धातुपाठः-१२९२) इति धातोः लिटि तिपि णलि द्वित्वेऽभ्यासस्य "लिट्यभ्यासस्योभयेषामि" (पा.सू ६। १। १७)ति सम्प्रसारणे ऋकारे, पूर्वरूपे, उरदत्वरपरत्वयो:, हलादिश्शेषे, तत्राभ्यासे वकारस्य पुनः सम्प्रसारणं प्राप्नोति, अकारस्थानिकस्य उरदत्वस्य स्थानिवद्भावेन सम्प्रसारणतया "न

सम्प्रसारणे सम्प्रसारणम्" इति निषेधाच्च न भवति। तत्र पक्षेऽस्मिन् सम्प्रसारणस्थानिकपूर्वरूपस्थानिकस्योरदत्वस्य स्थानिवत्वेन सम्प्रसारणत्वस्य सुवचतया अनल्विधाविति सम्प्रसारणनिषेधो न भवतीति तदर्थोऽचः परस्मिन्निति (पा.सू १। १। ५७)स्थानिवद्भावानुसरणप्रयासो नापेक्षित इति। एवञ्च एवं प्रकारेण ज्ञाप्यांशत्रयमादाय 'शकहूः' इत्यत्र स्थानिवद्भावेन सम्प्रसारणत्वमादाय "हलः" इति दीर्घसिद्धिः, 'शकह्वर्थम्'इय्यत्र तु न पूर्वरूपे कर्तव्ये तत्वम्। 'सुध्युपास्यः' इत्यत्रापि न पूर्वरूपप्राप्तिरिति यण्निर्बाध इति भावः।

**अत्र चित्रप्रभाटिप्पणीकाराः-**

अत्रैकेन "हल:" इति दीर्घारम्भसामर्थ्यरूपज्ञापकेन त्रिविधार्थज्ञापनमनुचितम्। एकांशज्ञापनेन चरितार्थस्यांशान्तरज्ञापनायोग्यत्वात्। न च 'विनिगमनाविरहेण सिद्धञ्चेत्सर्वं सिद्धमिति'न्यायेन विनिगमनाविरहात्त्रिविधार्थज्ञापनमस्त्विति वाच्यम्। लाघवरूपविनिगमकस्य सत्वात्। तथा हि प्रथमांशस्यैव ज्ञापने ईजतुरित्यादौ दोषः तदवस्थ एव। किञ्च यदंशस्य ज्ञापने स्वांशे चारितार्थ्यसम्भवः तस्यैव सामान्यधर्मावच्छिन्नस्य विशेषधर्मावच्छिन्नस्य वा अंशस्य ज्ञापकत्वं युक्तं, न तु तच्चारितार्थ्याप्रयोजकार्थान्तरस्य। तथा च द्वितीयज्ञापने 'अन्यस्य वा' इत्यंशस्य, तृतीयज्ञापने च 'तत्स्थानिकस्य' इत्यंशस्य च ज्ञाप्यशरीरघटकत्वं न युज्यते। अत एव वव्रश्चेति सिद्धये आसप्तमपरिसमाप्तेरङ्गाधिकारः इति पक्षाश्रयणं भाष्यकृतः सङ्गच्छते। अन्यथा अनेनैव सिद्धौ तदसङ्गतिः स्पष्टैव। किञ्च द्वितीयार्थज्ञापनस्य प्रयोजनमपि नास्ति। यून इत्यत्र सम्प्रसारणपूर्वरूपानन्तरं सवर्णदीर्घस्यावश्यंभावितया तस्य सम्प्रसारणत्वाभावात् "अचः परस्मिन्पूर्वविधौ" (पा.सू १। १। ५७) इत्यस्यैव आश्रयणीयतया तेन उकारव्यवधानस्य गले पतितत्वेन तद्व्यवधानेऽपि प्रवृत्त्यर्थं निषेधारम्भसामर्थ्यस्य आश्रयणीयतया भक्षितेऽपि लशुने न शान्तो व्याधिः। न चैवं ईजतुरित्यादि कथम्?तत्र 'इ इज् अतुस्' इत्यत्र सम्प्रसारणत्वमादाय सवर्णदीर्घं प्रबाध्य पूर्वरूपे दीर्घाश्रवणादिति वाच्यम्। "हलः" इत्यारम्भसामर्थ्यात् अल्विधौ स्थानिवत्वाङ्गीकारेऽपि इति शब्दरत्नमते "हलः"इति दीर्घरूपाल्विधौ स्थानिवत्वाङ्गीकारेऽपि' इत्यर्थात्। तथा च 'ईजतु'रित्यादौ द्वितीयपूर्वरूपविधौ अनल्विधाविति निषेधसत्वेन स्थानिवद्भावाभावात् सवर्णदीर्घस्यैव प्राप्तेः रूपं निष्प्रत्यूहमेवेति। तथा च चित्रप्रभाकाराणां ज्ञाप्यांशत्रयकथनमनुचितमेवेति बोध्यम्।

**निष्कर्षः-**

'शकान् ह्वयति'इति विग्रहे ह्वे-धातोः आदौ आदेच उपदेशेऽशिति (पा.सू ६। १। ४५) इत्यनेन आकारादेशे ततश्च क्विप्-प्रत्यये, वचिस्वपियजादीनां किति (पा.सू ६। १। १५) इत्यनेन वकारस्य सम्प्रसारणे उकारे, तत उकार-आकारयोः सम्प्रसारणाच्च इति पूर्वरूपे ततः "हलः" इत्यनेन दीर्घादेशे कृते शकहू-शब्दः सिद्ध्यति। एवमेव परिपूर्वाद्ध्येञः क्विपि, तस्य सर्वापहारिलोपे यजादित्वात् "वचिस्वपियजादीनां किति" इति सूत्रेण संप्रसारणे "सम्प्रसारणाच्च" इति पूर्वरूपे 'हलः' इति दीर्घे परिवी-शब्दो निष्पद्यते। तत्रोभयत्रार्थशब्देन समासे सम्प्रसारणत्वं स्थानिवद्भावेनादाय पुनः 'सम्प्रसारणाच्च' इति पूर्वरूपं प्राप्नोति। तथा च यण्घटितप्रयोगो नोपपद्येत। किञ्च वस्तुतः सम्प्रसारणत्वं सुधीत्यत्रेकारे नानेतुं शक्यमिति तत्र तमुपजीव्य "हलः" इति दीर्घोऽपि कथम्? इति चेदत्र "हलः" इति ज्ञापनेन तत्समाधानमाहुः चित्रप्रभाकाराः। तत्र तैः प्रदर्शिताः त्रितयज्ञाप्यांशा एवं सन्ति-

क) सम्प्रसारणस्थानिकमात्रस्थानिककार्यप्रयोजकस्थानिवद्भावप्रयोज्यसम्प्रसारणत्वस्यानल्विधाविति प्रतिषेधो न प्रतिबन्धकः॥

ख) सम्प्रसारणस्थानिकस्य स्थानिवद्भावेन सम्प्रसारणत्वमाश्रित्य तस्यान्यस्य वा पूर्वरूपातिरिक्तकार्य-कर्तव्यतायामनल्विधाविति निषेधो न प्रवर्तते ॥

ग) सम्प्रसारणस्थानिकस्य तत्स्थानिकस्य वा स्थानिवद्भावेन सम्प्रसारणत्वमादाय पूर्वरूपातिरिक्ते यत्किञ्चित्कार्ये कर्तव्ये नास्त्यनल्विधाविति प्रतिषेधः ॥

एतादृशज्ञापनेन च 'शकह्वर्थम्' 'परिव्यर्थम्' 'सुध्युपास्यः' इत्यत्र चार्थ-उपास्यशब्दघटकाद्यचा न पूर्वरूपम्, "हलः" इति दीर्घसिद्धिश्च। वस्तुतस्तु नैवं ज्ञापयितुं शक्यते, एकस्यैव ज्ञापनस्य त्रिविधार्थज्ञापयितुमशक्यत्वात्। एवमपि 'इजतुः' इत्यादौ दोषतादवस्थ्यात्। तथा च सिद्धान्ते "हलः" (पा.सू ६। ४। २) इति सूत्रसामर्थ्याद्दीर्घस्तावद्भवति, ततः सम्प्रसारणत्वमादाय पुनः पूर्वरूपन्तु न भवतीति शिवम्।

## कृतज्ञताज्ञापनम्

शोधस्यास्य प्राविधिकदृष्ट्या विषयप्रतिपादनदृष्ट्या च साधु परीक्षणं विधाय सम्पादनाय परिष्काराय च हार्दमुपकारं कृतवद्भ्य: सर्वेभ्यो विशेषज्ञेभ्य: गुरुजनेभ्यश्च सहायकेभ्यश्चान्येभ्यो हार्दं कार्तज्ञ्यं व्यनज्मि।

## सन्दर्भग्रन्थसूची

भट्टोजिदीक्षितः, (सन् २०१७) *सिद्धान्तकौमुदी* श्रीमद्भट्टोजिदीक्षितविरचिता, मूलमात्रम्, श्रीगोविन्दाचार्यः, चौखम्बासुरभारतीप्रकाशनम्, वाराणसी।

पतञ्जलिः, (सन्२०२३), *महाभाष्यम्*, चौखम्बा संस्कृत प्रतिष्ठान ॥

*चित्रप्रभा* (१९३२) सुब्रह्मण्यशास्त्रिकृतलघुटिप्पणीसहिता, आन्ध्रा विश्वविद्यालयः।

श्रीभट्टोजीदीक्षितः (सन् २००९) *प्रौढमनोरमा सशब्दरत्ना* (अव्ययीभावान्ता), चौखम्बा संस्कृत संस्थान, वाराणसी।

श्रीवैद्यनाथ झा(व्या.) (सन् २०२४) *प्रौढमनोरमा* इन्दुकलाव्याख्यासहिता, रचना प्रकाशन, जयपुर।

श्रीनागेशः ( सन् १९४१), *लघुशब्देन्दुशेखर*: (सुब्रह्मण्य शास्त्री, व्या.) श्रीविद्यामुद्रणालयः, आन्ध्रा।

श्रीनागेश: (सन् २०२३) *व्याकरणमहाभाष्यस्थोद्योतटीका*, चौखम्बा संस्कृत प्रतिष्ठान।

भर्तृहरि, (सन् २०२३) *वाक्यपदीयम्*, वाराणसी, सुरसरस्वतीभवनग्रन्थमाला।

भट्टोजिदीक्षितः (सन् २०१५) *प्रौढमनोरमा*, बालप्रकाशिका, चौखम्बा संस्कृत प्रतिष्ठान।

नीलेश बोडस(सम्पा.), (२०८३) *पाणिनिसूत्रम्* (अष्टाध्यायी), प्राविधिकमाध्यमेन {ashtadhyayi.com (app)} ।